योगवासिष्ठः/प्रकरणम् ३ (उत्पत्तिप्रकरणम्)/सर्गः ०६३

त्रिषष्टितमः सर्गः ६३

श्रीवसिष्ठ उवाच ।

यदेतद्ब्रह्मतत्त्वं सर्वथा सर्वदैव सर्वत एव सर्व-

शक्ति सर्वाकारं सर्वेश्वरं सर्वगं सर्वमेवेति ।। १

एष त्वात्मा सर्वशक्तित्वाच्च क्वचिच्चिच्छक्तिं प्रक-

टयति क्वचिच्छान्तिं क्वचिज्जडशक्तिं क्वचिदुल्लासं

क्वचित्किंचिन्न किंचित्प्रकटयति ।। २

यत्र यदा यदेवासौ यथा भावयति तत्र तदा

तदेवासौ प्रपश्यति ।। ३

सर्वशक्तेर्हि या यैव यथोदेति तथैव सा ।। ४

तदास्ति शक्तिर्नानारूपिणी सा स्वभावत इमाः

शक्तयोऽयमात्मेति ।। ५

एवं विकल्पजालं व्यवहारार्थं धीमद्भिः परिक-

ल्पितं लोके नत्वात्मनि विद्यते भेदः ।। ६

यथोर्मितरङ्गपयसां सागरे कटकाङ्गदकेयूरैर्वा

हेम्नः । अवयवावयविनोः संवित्काल्पनिकी द्विता

न वास्तवी ।। ७

यथा यच्चेत्यते हि तथैव तन्न बाह्यतो नान्तरत-

श्चैतत्समुदेति हि ।। ८

सर्वात्मत्वात्समाभासं क्वचित्किंचित्प्रपश्यति ।। ९

सर्वाकारमयं ब्रह्मैवेदं ततं मिथ्याज्ञानवद्भिः

शक्तिशक्तिमत्त्वे अवयवावयविरूपे कल्पिते न पार-

मार्थिके ।। १०

सद्वा भवत्वसद्वा चिद्यत्संकल्पयत्यभिनिविशति

तत्तत्पश्यति सकला तत्सद्ब्रह्मैव चिद्भाति ।। ११

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये उत्पत्तिप्रकरणे लीलो० चित्तविकारो नाम त्रिषष्टितमः सर्गः ।। ६३ ।।